[A-56] SEAT No.______ No. of Printed Pages: 02

# Sardar Patel University

M. A. (Final) (External) Examination
Friday Date: 05/04/2019 Time: 02.00 P.M. to 05.00 P.M.
**SAN-506: P-VI :** Brahmasutra Anubhashya (Adhyay 1&2- Niyat Sutras),
Brahmasutra Shribhashya (1.1.1)

Total Marks: 100

પ્રશ્ન: ૧ ગમે તે બે સાનુવાદ સમજાવો: (૧૪)

१. अधिकारी तु त्रैवर्णिक एव। न हि वेदविचारस्य वेदाधिकार्यतिरिक्त: शक्यते कल्पयितुम्। नहि मन्दमतेर्वेदो नायातीति त्रैवर्णिके मतिमच्वमधिकारीविशेषणं कल्प्यते। अन्धपङ्ग्वादीनामिव कर्मणि, गृहाधासक्तस्य मननाध-सम्भवात् साक्षात्कारो न भविष्यति। न च धर्मान्यायेन गतार्थत्वमस्य, अप्रतिज्ञानादनुपलब्धेश्च। नच जगत्कारणं परमात्मा वा प्रकृतिर्वा परमाणवो वेति सन्देहे किञ्चिदधिकरणमस्ति।

२. ईक्षतिकर्मव्यपदेशात्। जीवघनात् केवलजीवाधारभूताद् ब्रह्मलोकात् पररूपपुरुषदर्शनं ईक्षति:। तस्या: कर्मत्वेन व्यपदेशात्। उभयो: कर्मणोरेकत्वमपरं त्रिमात्रपर्यन्तं निरूप्य परं ह्यग्रे निरूपयति। तथैव च श्लोके 'तिस्रो मात्रा' इत्यादि। अभिध्यानस्य हि साक्षात्कार: फलं, अत: फलरूपज्ञानस्य विषयत्वात् परपुरुष: परमात्मैव। मन्दशङ्कानिवृत्त्यर्थमेवेदं सूत्रम्। अत्र सर्वसङ्करवादिनामन्यथापाठो भ्रमात्, तत्रापि विचारस्तुल्य:।

३. वेदोक्तेर्थे शुष्कतर्केण प्रत्यवस्थानमयुक्तं, तर्कस्याप्रतिष्ठानात् तर्को नाम स्वोत्प्रेक्षिता युक्ति:। सा एकोक्ता नान्यैरङ्गीक्रीयते। स्वतन्त्राणामृषीणां मतिभेदात् वस्तुनो द्वैरूप्यासम्भवात् नियामकाभावाच्च। अतो न तर्कस्य प्रतिष्ठा। पूर्वपक्षिण: परिहार:। अप्यन्यथानुमेयमिति चेत्, एवमप्यन्यथा वयमनुमस्यामहे यथा नाप्रतिष्ठादोषो भविष्यति। न हि कोपि तर्क: प्रतिष्ठितो नास्तीति वक्तुं शक्यते। व्यवहारोच्छेदप्रसङ्गात्। 'आर्षं धर्मोपदेशञ्च वेदशास्त्रविरोधिना यस्तर्केणानुसन्धत्ते स धर्मं वेद नेतर' इति स्मृति:।

४. ननु जीवोप्युत्पद्यतां किमिति भाक्तत्वं कल्प्यते इति चेत् न। आत्मा नोत्पद्यते। कुत:। अश्रुते:। न हि आत्मन उत्पत्ति: श्रूयते। देवदत्तो जातो विष्णुमित्रो जात इति देहोत्पत्तिरेव नतु तद्व्यतिरेकेण पृथक् जीवोत्पत्ति: श्रूयते। विस्फुलिङ्गवदुच्चरणं नोत्पत्ति:। नामरूपसम्बन्धाभावात्। एतस्य गुणा: स्वरूपं चाग्रे वक्ष्यते। किञ्च नित्यत्वाच्च ताभ्य: श्रुतिभ्य:। 'अयमात्माजरोमर: न जायते म्रियते' इत्येवमादिभ्य:।

પ્રશ્ન: ૨ કોઈપણ બે સૂત્રો અણુભાષ્ય અનુસાર સમજાવો: (૧૦)

१. अथातो ब्रह्मजिज्ञासा।
२. पयोम्बुवच्चेत् तत्रापि।
३. अत्ता चराचरग्रहणात्।
४. आभास एव च।

પ્રશ્ન: ૩ ગમે તે બે વિશે નોંધ લખો: (૨૦)

૧. વલ્લભાચાર્યનું કવન
૨. અણુભાષ્યના ટીકાકારો
૩. સાંખ્યમત ખંડન
૪. અણુભાષ્ય શીર્ષક

(P.T.O.)

પ્રશ્નઃ ૪ વલ્લભાચાર્યના મતે પ્રમાણમીમાંસા ચર્ચો (૧૬)

અથવા

પ્રશ્નઃ ૪ આવિર્ભાવ-તિરોભાવ વિશે સવિસ્તર નોંધ લખો (૧૬)

પ્રશ્નઃ૫ (અ) ગમે તે એક સાનુવાદ સમજાવોઃ (૧૦)

१. ध्यानं च- तैलधारावदविच्छिन्नस्मृतिसंतानरूपम्, स्मृति-लम्भे सर्वग्रन्थीनां विप्रमोक्षः इति ध्रुवायाः स्मृतेरपवर्गोपायत्वश्रवणात्। सा च स्मृतिर्दर्शनसमानाकाराः, भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः। क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे इत्यनेनैकार्थ्यात्। एवं च सति आत्मा अरे द्रष्टव्यः इत्यनेन निदिध्यानस्य दर्शनरूपता विधीयते। भवति च स्मृतेर्भावनाप्रकर्षाद्दर्शनरूपता। वाक्यकारेणैतत्सर्वं प्रपञ्चितम्। वेदनमुपासनं स्यात्तद्विषये श्रवणात् इति। सर्वासूपनिषत्सु मोक्षसाधनतया विहितं वेदनमुपासनमित्युक्तम्। सकृत्प्रत्ययं कुर्याच्छब्दार्थस्य कृतत्वात्प्रयाजादिवत् इति पूर्वपक्षं कृत्वा सिद्धं तूपासनशब्दात् इति वेदनमसकृदावृत्तं मोक्षसाधनमिति निर्णीतम्।

२. प्रवृत्तिनिमित्तभेदेनैकार्थवृत्तित्वं सामानाधिकरण्यम्। तत्र सत्यज्ञानादिपदमुख्यार्थैर्गुणैः, तत्तद्गुण-विरोध्याकारप्रत्यनीकाकारैर्वैकस्मिन्नेवार्थे पदानां प्रवृत्तौ निमित्तभेदोऽवश्याऽऽश्रयणीयः। इयांस्तु विशेषः- एकस्मिन्पक्षे पदानां मुख्यार्थता, अपरस्मिंश्च तेषां लक्षणा। न चाज्ञानादीनां प्रत्यनीकता वस्तुस्वरूपमेव, एकेनैव पदेन स्वरूपं प्रतिपन्नमिति पदान्तरप्रयोगवैयर्थ्यात्। तथा सति सामानाधि-करण्यासिद्धिश्च, एकस्मिन्वस्तुनि वर्तमानानां पदानां निमित्तभेदानाश्रवणात्। न चैकस्यावार्थस्य विशेषणभेदेन विशिष्टताभेदादनेकार्थत्वं पदानां सामानाधिकरण्यविरोधि, एकस्यैव वस्तुनोऽनेक-विशेषणविशिष्टताप्रतिपादनपरत्वात्सामानाधिकरण्यस्य।

પ્રશ્નઃ ૫ (બ) નીચેનાંમાંથી કોઈપણ એક શ્રીભાષ્ય અનુસાર સમજાવોઃ (૧૦)

૧. **नेह नानास्ति किञ्चन**-નું રામાનુજે કરેલું અર્થઘટન

૨. **एकमेवाद्वितीयम्**-નું રામાનુજે કરેલું અર્થઘટન

પ્રશ્નઃ ૬ ગમે તે બે વિશે નોંધ લખોઃ (૨૦)

૧. શ્રીસંપ્રદાય વિશે નોંધ લખો

૨. લઘુપૂર્વપક્ષની દલીલો આપો

૩. સપ્તવિધ અનુપપત્તિઓ

૪. ભેદાભેદવાદનું ખંડન

—X—

(2)